

री निवासी

ङ्कित:

ाय:

ॐ

२ ।



ॐ

श्रीरामचन्द्राय नमः

(गणेशस्तोत्रम्)

ॐ विघ्नजिते विघ्नहर्त्रे विघ्ननायकाय

श्रीमहागणेशाय नमो नमः ॥ शुभमस्तु ॥

ॐ नमो नमो गजेन्द्राय एकदन्तधराय च ॥

नमः ईश्वरपुत्राय श्रीमहागणेशाय नमः ॥

अथ गणेशनामाष्टकस्तोत्रम् ॥

श्रीविष्णुरुवाच ॥

गणेशमेकदन्तं च हेरम्बं विघ्ननायकम् ।

लम्बोदरं शूर्पकर्णं गजवक्त्रं गुहाग्रजम् ॥

नामाष्टार्थं च पुत्रस्य शृणु मातर्हरप्रिये ।

स्तोत्राणां सारभूतं च सर्वविघ्नहरं परम् ॥

ज्ञानार्थवाचको गश्च णश्च निर्वाणवाचकः ।

तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम् ॥

एकशब्दः प्रधानार्थो दन्तश्च बलवाचकः ।

[illegible]

॥ गणेशस्तोत्रम् ॥

दीनाश्च बालकैः हेरम्ब रम्बः पालक कारकः।
[illegible] पालकं दीनानां हेरम्बं प्रणमाम्यहम्॥
[illegible] कारकैः विघ्नो नायकः विघ्ननाशकः।
विघ्न[illegible] कारकं नमामि विघ्ननायकम्।
[illegible] दैश्च नैवेद्यैः पूजितं लम्बोदरं प्रभुम्।
[illegible] दैश्च विविधैः वन्दे लम्बोदरं च तम्॥
[illegible] च फलैः। विघ्नवारणकारकः।
[illegible] तानदयैः च पूजितं नमाम्यहम्॥
[illegible] च पम्पूजिते [illegible]
[illegible] गजवक्त्रं नमाम्यहम्॥
[illegible] पूजितो यः विघ्नहर्ता हेरम्बयो।
[illegible] देवं सर्वदेवादि पूजितम्॥
[illegible] नानाविधैः [illegible]
[illegible] च [illegible]॥

(गणेशस्तोत्रम्)

इदं गणाधिपस्तोत्रं नानार्थैः संयुतं शुभम् ।
त्रिसंध्यं यः पठेन्नित्यं स सुखी भवतेऽजयी ।
ततो विघ्नाः पलायन्ते वैनतेयाद्यथोरगाः ॥
गणेश्वरप्रसादेन महाज्ञानी भवेत् ध्रुवम् ॥
पुत्रार्थी लभते पुत्रं भार्यार्थी विपुलां स्त्रियम् ।
महाजडः कवीन्द्रश्च विद्यावांश्च भवेत् ध्रुवम् ॥

इति श्रीगणेशस्तोत्रं समाप्तम् ॥

। अथ गणेशकवचम् ।

श्री विष्णुरुवाच ।

ॐ अस्य श्री संसारमोहनस्य गणे[illegible]
चस्य प्रजापतिः ऋषिः, बृहती [illegible]
श्री लम्बोदरो देवता, धर्मार्थ[illegible]
मोक्षे जपे (पाठे वा) विनियोगः [illegible]

(गणेश कवचम्)

...मोहनस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च बृहती देवो लम्बोदरः स्वयम्॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः।
सर्वेषां कवचानां च सारभूतमिदं मुने॥
ॐ गं हुं श्रीगणेशाय स्वाहा मे पातु मस्तकम्।
द्वात्रिंशदक्षरो मन्त्रो ललाटं मे सदावतु॥२॥
ॐ ह्रीं क्लीं श्रीं गमिति च सततं पातु लोचनम्।
तालुकं पातु विघ्नेशः सततं धरणीतले॥४॥
ॐ ह्रीं श्रीं क्लीमिति च सततं पातु नासिकाम्।
ॐ गौं गं शूर्पकर्णाय स्वाहा पात्वधरं मम॥५॥
दन्तानि तालुकां जिह्वां पातु मे षोडशाक्षरः।
ॐ लं श्रीं लम्बोदरायेति स्वाहा गण्डं सदावतु।
ॐ क्लीं ह्रीं विघ्ननाशाय स्वाहा कर्णं सदावतु॥
ॐ [illegible] सदावतु।
ॐ ह्रीं विनाय[illegible] सदावतु॥ [illegible]॥

(गणेश कवचम्)

ॐ क्लीं ह्रीमिति कङ्कालं पातु वक्षस्थलं च गम्॥
करौ पादौ सदा पातु सर्वाङ्गं विघ्ननिघ्नकृत्॥१॥
प्राच्यां लम्बोदरः पातु आग्नेय्यां विघ्ननायकः।
दक्षिणे पातु विघ्नेशो नैर्ऋत्यां तु गजाननः॥२॥
पश्चिमे पार्वतीपुत्रो वायव्यां शंकरात्मजः॥
कृष्णस्यांशश्चोत्तरे च परिपूर्णतमस्य च॥३॥
ऐशान्यामेकदन्तश्च हेरम्बः पातु चोर्ध्वतः।
अधो गणाधिपः पातु सर्वपूज्यश्च सर्वतः॥४॥
स्वप्ने जागरणे चैव पातु मां योगिनां गुरुः॥
इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम्।
संसारमोहनं नाम कवचं परमाद्भुतम्॥
श्रीकृष्णेन पुरा दत्तं गोलोके रासमण्डले॥
वृन्दावने विनीताय मह्यं दिनकरात्मजः।
मया दत्तं च तुभ्यं च यस्मै कस्मै न दास्यसि॥

परं वरं [illegible]

([illegible]) (गणेश कवचम्)

गुरुमभ्यर्च्य विधिवत्कवचं धारयेत्तु यः ।
कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
ग्रहेन्दु कवचस्यास्य कलां नार्हन्ति षोडशीम् ॥
इदं कवचमज्ञात्वा यो भजेच्छंकरात्मजम् ॥
शतलक्षप्रजप्तोऽपि न मंत्रसिद्धिदायकः ॥[illegible]॥

इति श्रीगणेशकवचः सम्पूर्णः प्रीयतां प्रीतोऽस्तु ॥

(श्रीकृष्णस्तोत्रम्)

ॐ श्रीवत्सभूषिताय श्रीप्रियाय परात्पराय पर-
मब्रह्मपरात्मने श्रीकृष्णाय नमो नमः।

अथ विष्णुमहेशब्रह्माकृतश्रीकृ-
ष्णस्तोत्रम्॥

वरं वरेण्यं वरदं वरार्हं वरकारणम्।
कारणं कारणानां च कर्म तत्कर्मकारणम्॥
तपस्तत्फलदं शश्वत् तपस्विनां च तापसम्।
वन्दे नवघनश्यामं स्वात्मारामं मनोहरम्॥
निष्कामं कामरूपं च कामघ्नं कामकारणम्।
सर्वं सर्वेश्वरं सर्वबीजरूपमनुत्तमम्॥१॥
वेदरूपं वेदबीजं वेदोक्तफलदं फलम्।
वेदज्ञं तद्विधानं च सर्ववेदविदांवरम्॥

॥इति श्रीविष्णुकृतस्तोत्रम्॥

(७) (श्रीकृष्णस्तोत्रम्)

जयस्वरूपं जयदं जयेशं जयकारणम् ।
प्रवरं जयदानां च वन्दे तमपराजितम् ॥१॥
विश्वं विश्वेश्वरेशं च विश्वेशं विश्वकारणम् ।
विश्वाधारं च विश्वस्तं विश्वकारणकारणम् ॥२॥
विश्वरक्षाकारणं च विश्वघ्नं विश्वजं परम् ।
फलबीजं फलाधारं फलं च तत्फलप्रदम् ॥३॥
तेजःस्वरूपं तेजोदं सर्वतेजस्विनां वरम् ॥३½॥

इति श्रीमहेशकृत स्तोत्रम् ॥

कृष्णं वन्दे गुणातीतं गोविन्दमेकमक्षरम् ।
अव्यक्तमव्ययं व्यक्तं गोपवेषविधायिनम् ॥१॥
किशोरवयसं शान्तं गोपीकान्तं मनोहरम् ।
नवीननीरदश्यामं कोटिकन्दर्पसुन्दरम् ॥२॥
वृन्दावनवनाभ्यर्णे रासमण्डलसंस्थितम् ।

रासेश्वरं रासवासं रासोल्लाससमुत्सुकम् ॥३॥

(श्रीविष्णुस्तोत्रम्)

ॐ अथ ब्रह्माशंकर संवादे कृत श्रीविष्णुस्तोत्रम्

ब्रह्मोवाच

नमामि कमलाकान्तं शान्तं सर्वेशमच्युतम्।
वयं यस्य कलाभेदाः कलांशकलया सुरासुराः।
मनवश्च मुनीन्द्राश्च मनुष्याश्च चराचराः॥
कलाकलांशकलया भूतास्तं तं निरञ्जनम्॥१॥

शंकर उवाच

त्वामक्षयमक्षरं वा व्यक्तमव्यक्तमीश्वरम्॥
अनादिमादिमानन्दरूपिणं सर्वरूपिणम्॥२॥
अणिमादिकसिद्धीनां कारणं सर्वकारणम्।
सिद्धिज्ञं सिद्धिदं सिद्धिरूपं कः स्तोतुमीश्वरः॥

धर्म उवाच

वेदे निरूपितं वस्तु वर्णनीयं विचक्षणैः
[illegible]
यस्य [illegible]

यदीरितं स्तवनं भिमहं शौनकि निष्ठितमाद्दि॥
ब्रह्मादीनामिदं स्तोत्रं षट्श्लोकोक्तं महाद्भुतम्।
पठितं शृणुते दुर्गां दारिद्र्यं तं व्रजमे द्वारः॥७॥
॥इति शुभं भूयात्सर्वजगताम्॥

अथ श्रीनारायणकवचम्॥

ॐ श्रीमङ्गलात्मने पशुपतनाय परमब्रह्मणे
श्रीमन्नारायणाय नमो नमः॥
ॐ अस्य श्रीनारायणवर्मस्तोत्रमन्त्रस्य
विश्वरूप ऋषिस्त्रिष्टुबनुष्टुप् छन्दसी
अवतारविग्रहः सायुधः सपार्षदो
नारायणो देवता ॐ बीजं ह्रां शक्तिः
कीलकम् विजयसिद्ध्यर्थे नारायणप्रीत्यर्थे
जपे (पाठे वा) विनियोगः॥

अथ मङ्गलम्।

(श्रीनारायणकवचम्)

ॐ ॐ नमः पादयोः, ॐ नं नमः-जानुनोः।
ॐ मों नमः-ऊर्वोः, ॐ नां नमः-उदरे।
ॐ रां नमः-हृदि, ॐ यं नमः-उरसि।
ॐ णां नमः-मुखे, ॐ यं नमः-शिरसि॥

अथ करन्यासः

ॐ ॐ नमः दक्षिण तर्जन्याम्।
ॐ नं नमः दक्षिणमध्यमायाम्॥
ॐ मों नमः दक्षिणानामिकायाम्।
ॐ भं नमः दक्षिणकनिष्ठकायाम्।
ॐ गं नमः वामकनिष्ठकायाम्॥
ॐ वं नमः वामानामिकायाम्॥
ॐ तें नमः वाममध्यमायाम्।
ॐ वां नमः वामतर्जन्याम्॥
ॐ सुं नमः दक्षिणाङ्गुष्ठोर्ध्वपर्वणि

ॐ दं नमः दक्षिणाङ्गुष्ठयोः पर्वणि।

ॐ वं नमः वामाङ्गुष्ठोर्ध्वपर्वणि॥

ॐ यं नमः वामाङ्गुष्ठयोः पर्वणि॥

अथ विष्णुषडक्षरन्यासः॥

ॐ ॐ नमः हृदये, ॐ विं नमः मूर्धनि

ॐ षं नमः भ्रुवोर्मध्ये, ॐ णं नमः शिखायाम्

ॐ वें नमः नेत्रयोः, ॐ नं नमः सर्वसन्धिषु॥

ॐ मः अस्त्राय फट् प्राच्याम्।

" आग्नेय्याम्, " दक्षिणस्याम्, "

नैर्ऋत्ये, " प्रतीच्याम्, " वायव्ये "

उदीच्याम्, " ऐशान्याम्, " ऊर्ध्वायाम्

ॐ मः अस्त्राय फट् अधरायाम्

(श्रीनारायणकवचम्)

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ।
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥

श्री शुक उवाच ॥

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ २ ॥

विश्वरूप उवाच ॥

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥
नारायणमयं वर्म संनह्येद् भय आगते ॥
पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ४ ॥
[illegible]
ॐ नमो नारायणा[illegible]

न्यासं ततः कुर्यात् द्वादशाक्षरविद्यया।
प्रणवादि यकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥७॥
न्यसेद् हृदय ओंकारं विकारमनु मूर्धनि।
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥८॥
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद् बुधः ॥९॥
सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत्।
ॐ विष्णवे नमः इति ॥१०॥
आत्मानं परमं ध्यायेद् ध्येयं षट्शक्तिभिर्युतम्।
विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥११॥
ॐ हरिर्विदध्यान्मम सर्वरक्षां
न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे।
दरारिचर्मासिगदेषुचाप...
...पाशान् दधानोऽष्टगुणोऽष्टबाहुः॥

(श्रीनारायणकवचम्)

जलेषु मां रक्षतु मत्स्यमूर्ति-

र्यादोगणेभ्यो वरुणस्य पाशात् ।

स्थलेषु मायावटुवामनोऽव्यात्

त्रिविक्रमः खेऽवतु विश्वरूपः ॥१२

दुर्गेष्वटव्याजिमुखादिषु प्रभुः

पायान्नृसिंहोऽसुरयूथपारिः ।

विमुञ्चतो यस्य महाट्टहासं

दिशो विनेदुर्न्यपतंश्च गर्भाः ॥१४

रक्षत्वसौ माध्वनि यज्ञकल्पः

स्वदंष्ट्रयोन्नीतधरो वराहः ।

रामोऽद्रिकूटेष्वथ विप्रवासे

सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥

मामुग्रधर्मादखिलात् प्रमादा-

न्नारायणः पातु नरश्च हासात्

दत्तस्त्वयोगादथ योगनाथः
पायाद् गुणेशः कपिलः कर्मबन्धात्॥
सनत्कुमारोऽवतु कामदेवा-
द्धयशीर्षा मां पथि देवहेलनात्।
देवर्षिवर्यः पुरुषार्चनान्तरात्
कूर्मो हरिर्मां निरयादशेषात्॥१७॥
धन्वन्तरिर्भगवान् पात्वपथ्यात्
द्वन्द्वाद् भयादृषभो निर्जितात्मा॥
यज्ञश्च लोकादवताज्जनान्तात्
बलो गणात् क्रोधवशादहीन्द्रः॥१८॥
द्वैपायनो भगवानप्रबोधाद्
बुद्धस्तु पाखण्डगणात् प्रमादात्॥
कल्किः कलेः कालमलात्प्रपातु
धर्मावनायोरुकृतावतारः॥१९॥

मां केशवो गदया प्रातरव्याद्
गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्ति-
र्मध्यंदिने विष्णुररीन्द्रपाणिः ॥२०॥
देवोऽपराह्णे मधुहोग्रधन्वा
सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे
निशीथ एकोऽवतु पद्मनाभः ॥२१॥
श्रीवत्सधामापररात्र ईशः
प्रत्यूष ईशोऽसिधरो जनार्दनः ॥
दामोदरोऽव्यादनुसंध्यं प्रभाते
विश्वेश्वरो भगवान् कालमूर्तिः ॥२२॥
चक्रं युगान्तानलतिग्मनेमि
भ्रमत् समन्ताद् भगवत्प्रयुक्तं ।

देवानिधि देवगण्यरि सैन्यमाशु
कक्षं यथा वातसखो हुताशः॥१९॥
गदेऽशनिस्पर्शन विस्फुलिङ्गे
निष्पिण्ढि निष्पिण्ढ्यजित प्रियासि॥
कूष्माण्ड वैनायक यक्ष रक्षो
भूत ग्रहांश्चूर्णय चूर्णयारीन्॥२०॥
त्वं यातुधान प्रमथ प्रेत मातृ-
पिशाच विप्रग्रह घोर दृष्टीन्॥
(दरेन्द्र) दरेन्द्र विद्रावय कृष्णपूरितो
भीमस्वनोऽरेर्हृदयानि कम्पयन्॥२१॥
त्वं तिग्मधारासिवरारि सैन्य-
मीशप्रयुक्तो मम छिन्धि छिन्धि॥
चक्षूंषि चर्मञ्छतचन्द्र छादय
द्विषामघोनां हर पापचक्षुषाम्॥

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽंहोभ्य एव वा॥२७॥
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात्।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः॥२८॥
गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः॥२९॥
सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः।
बुद्धीन्द्रियमनः प्राणान् पान्तु पार्षदभूषणाः॥३०॥
यथा हि भगवानेव वस्तुतः सदसच्च यत्।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः॥३१॥
यथैकात्म्यानुभावानां विकल्परहितः स्वयम्।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया॥
तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः

विदिक्षु दिक्षूर्ध्वमधः समन्ता-
दन्तर्बहिर्भगवान् नारसिंहः॥
प्रहापयँल्लोकभयं स्वनेन
स्वतेजसा ग्रस्तसमस्ततेजाः॥३४॥
मघवन्निदमाख्यातं वर्म नारायणात्मकम्॥
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान्॥३५॥
एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते॥३६॥
न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत्।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित्॥३७॥
इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि॥३८॥
तस्योपरि विमानेन गन्धर्वपतिरेकदा।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः॥

गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः ॥
स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥

श्रीशुक उवाच ॥

य इदं शृणुयात् काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥४१॥
एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥
॥४२॥

इति श्रीनारायणकवचं: साङ्गः सायुध
सवाहनः प्रीयतां प्रीतोऽस्तु ॥
॥ इति शुभं भवतु ॥

 (श्रीरामरक्षा स्तोत्रम्)

ॐ श्री रघुकुलतिलकाय रक्षःकुलविनाश-
कृते सीताविप्रियाय भरताग्रजे श्रीरामचन्द्राय
नमो नमः॥

ॐ चरितं रघुनाथस्य शतकोटिप्रविस्तरम्।
एकैकमक्षरं पुंसां महापातकनाशनम्॥१॥
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम्॥२॥
सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम्॥
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम्॥३॥
रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम्।
शिरो मे राघवः पातु भालं दशरथात्मजः॥
कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः॥
[illegible] भरतवन्दितः।
[illegible] दिव्यायुधः [illegible] भग्नेशकार्मुकः

करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ॥७॥
सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः ॥
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥८॥
जानुनी सेतुकृत्पातु जंघे दशमुखान्तकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥९॥
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥१०॥
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥११॥
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥१२॥
जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
यः कण्ठे धारयेत्तस्य [illegible]

वज्रपंजरनामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ॥१४॥
आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः ।
तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥१५॥
आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥१६॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥१७॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ॥
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥१८॥
शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ॥
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥१९॥
आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषङ्गस
[illegible] वग्रतः
[illegible] सदैव गच्छताम् ॥२०॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः ॥ २१ ॥
रामो दाशरथीः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥ २२ ॥
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥ २३ ॥
इत्येतानि जपेन्नित्यं मद्भक्तः श्रद्धयान्वितः ।
अश्वमेधयुतं पुण्यं स प्राप्नोति न संशयः ॥ २४ ॥
रामं दूर्वादलश्यामं
पद्माक्षं पीतवाससम् ॥
स्तुवन्ति नामभिर्दिव्यै-
र्न ते संसारिणो नराः ॥ [illegible]

इति श्रीरामरक्षास्तोत्रं सम्पूर्णं [illegible]
[illegible]

 (श्रीकृष्णस्तोत्रम्)

अथ धर्मविरचितं महालक्ष्मीकृत कृष्णस्तोत्रं प्रारभ्यते ॥

ॐ श्रीगोपेश्वराय गोपीश्वराय गोरक्षकाय श्रीकृष्णाय नमो नमः ॥ शुभम् ॥

धर्म उवाच

कृष्णं विष्णुं वासुदेवं परमात्मानमीश्वरम् ।
गोविन्दं परमानन्दमेकमक्षरमच्युतम् ॥ १ ॥
गोपेश्वरं च गोपीशं गोपं गोरक्षकं विभुम् ।
गवामीशं च गोष्ठस्थं गोवत्सपुच्छधारिणम् ॥ २ ॥
गोपीगोपीमध्यस्थं प्रधानं पुरुषोत्तमम् ।
वन्दे नवघनश्यामं रासवासं मनोहरम् ॥ ३ ॥
इत्युच्चार्य समुत्तिष्ठन् रत्नसिंहासने वरे ।
[illegible]
[illegible] धर्मस्तं [illegible]
[illegible] जयी ॥ ५ ॥

मृत्युकाले हरेर्नाम तस्य साध्यं भवेद् ध्रुवम्।
स यात्यन्ते हरेः स्थानं ~~सुखलकरगतं भवेत्॥~~
हरिदास्यं लभेद् ध्रुवम्॥६॥
नित्यं धर्मार्थं घटते नाधर्मे तद्रतिर्भवेत्।
चतुर्वर्गफलं तस्य शश्वत् करगतं भवेत्॥७॥
तं दृष्ट्वा सर्वपापानि पलायन्ते भयेन च॥
भयानि चैव दुःखानि वैनतेयमिवोरगाः॥८॥

सरस्वत्युवाच –

रासमण्डलमध्यस्थं रासोल्लाससमुत्सुकम्।
रत्नसिंहासनस्थं च रत्नभूषणभूषितम्॥१॥
रासेश्वरं रासकरं वरं रासेश्वरीश्वरम्।
रासाधिष्ठातृदेवं च वन्दे रासविनोदिनम्॥२॥
रासायासपरिश्रान्तं रासे रासविहारिणम्।
रासोत्सुकानां गोपीनां कान्तं शान्तं मनोहरम्॥३॥
[illegible]
[illegible]

इति वाल्मीकिकृतं स्तोत्रं प्रातरुत्थाय यः पठेत्।
बुद्धिमान् धनवान् सोऽपि विद्यावान् पुत्रवान् सदा ॥५॥

(महालक्ष्म्युवाच)

सत्यस्वरूपं सत्येशं
सत्यबीजं सनातनम् ॥
सत्याधारं च सत्यज्ञं
सत्यमूलं नमाम्यहम् ॥१॥

॥ इति शुभमस्तु ॥ ॐ ॥

ॐ अथ ब्रह्माणं प्रति योगनिद्रयोपदिष्टं
श्रीकृष्णकवचम् ॥

ॐ राधिकापतये रासेश्वराय वासुदेवा
नन्दाय श्रीकृष्णाय क्लीं नमः ॥

योगनिद्रोवाच।

[illegible]

[illegible] ॥१॥

श्रीहरिः पातु ते वक्त्रं मस्तकं मधुसूदनः।
श्रीकृष्णश्चक्षुषी पातु नासिकां राधिकापतिः॥२॥
कर्णयुग्मं च कण्ठं च कपालं पातु माधवः।
कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम्॥३॥
अधरोष्ठं हृषीकेशो दन्तपंक्तिं गदाग्रजः॥
रासेश्वरश्च रसनां तालुकं वामनो विभुः॥४॥
वक्षः पातु मुकुन्दस्ते जठरं पातु दैत्यहा॥
जनार्दनः पातु नाभिं पातु विष्णुश्च ते हनुम्॥५॥
नितम्बयुग्मं गुह्यं च पातु ते पुरुषोत्तमः॥
जानुयुग्मं जानकीशः पातु ते सर्वदा विभुः॥६॥
हस्तयुग्मं नृसिंहश्च पातु सर्वत्र संकटे।
पादयुग्मे वराहश्च पातु ते कमलोद्भवः॥
ऊर्ध्वं नारायणः पातु ह्यधस्तात् कमलापतिः।
पूर्वस्यां पातु गोपालः पातु वह्नौ ...

 (श्रीकृष्णकवचम्)

वनमाली पातु याम्यां वैकुण्ठः पातु नैर्ऋतौ ॥
वारुण्यां वासुदेवश्च सतो रक्षाकरः स्वयम् ॥ ९ ॥
पातु ते संततमजो वायव्यां विष्टरश्रवाः ॥
[illegible]रे च सदा पातु तेजसा जलजासनः ॥ १० ॥
ऐशान्यामीश्वरः पातु सर्वत्र पातु शत्रुजित् ॥
[illegible]हे [illegible]ते [illegible]ल्लनिद्रे निद्रायां पातु राघवः ॥ ११ ॥
इत्येवं कथितं ब्रह्मन् कवचं परमाद्भुतम् ॥
[illegible]ेन कृपया दत्तं स्वतेनैव पुरा मम ॥ १२ ॥
[illegible]ेन सह संग्रामे निहिते घोरदारुणे ॥
[illegible]ने स्थितया सद्यः प्राप्तिमात्रेण सोऽजितः ॥ १३ ॥
कवचस्य प्रभावेण परस्यां पतितो हतः ॥
[illegible]
षष्ठे पुण्ये गोविन्दः [illegible]:

[illegible] दत्तं [illegible] जगाम ह ॥ १४ ॥

कल्पान्तरस्य वृत्तान्तं कृपया कथितं मुने ।
अभ्यन्तरभयं नास्ति कवचस्य प्रभावतः ॥ १६ ॥
कोटिशः कोटिशो नष्टा मया दृष्टाश्च वेधसः ।
अहं च हरिणा सार्धं कल्पे कल्पे स्थिरः सदा ॥ १७ ॥
इत्युक्त्वा कवचं दत्वा सान्तर्धानं चकार ह ।
निःशङ्को नाभिकमले तस्थौ च कमलोद्भवः ॥ १८ ॥
सुवर्णगुटिकायां तु कृत्वेदं कवचं परम् ।
कण्ठे वा दक्षिणे बाहौ बध्नीयाद्यः सुधीः सदा ॥ १९ ॥
विषाग्निसर्पशत्रुभ्यो भयं तस्य न विद्यते ।
जले स्थले चान्तरिक्षे निद्रायां रक्षतीश्वरः ॥ २० ॥
इति श्रीकृष्णकवचः सम्पूर्णः तेन
सर्वात्मनः प्रीयतां प्रीतोऽस्तु ॥

॥ ॐ शुभं भवतु ॐ ॥

॥ श्री ॥

वन्दे नवघनश्यामं [illegible]

ॐ श्री आशुतोषशंकराय पार्वतीप्राणनाथाय
गिरिजाप्रियाय जगत्कल्याणकर्त्रे जगद्गुरवे
भस्माङ्गरागाय शिवाय नमो नमः ॥ ॐ
[illegible] हक्कादीतपयोदमौक्तिकजवावर्णैर्मुखैः पंच[illegible]
त्र्यक्षैरञ्चितमीशमिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम् ॥
शूलं टङ्क[illegible]वज्रदहनान्नागेन्द्रघण्टाङ्कुशान्
पाशं भीतिहरं दधानममिताकल्पोज्ज्वलं चिन्तयेत् ॥
[illegible] सिन्दूरवर्णं [illegible] [illegible]वर्तेत
[illegible] त्रिनेत्रं [illegible] [illegible]रागम्
[illegible] [illegible] प्रियाय ।
[illegible] [illegible] [illegible]
[illegible]
[illegible]
[illegible]

इत्थं [illegible] कल्पा द्रुपाञ्च तरसैता भावयन्त [illegible]

[illegible] तौ दधतं [illegible] बलये [illegible] चाव [illegible] परम् ॥

भक्त्यस्तत्कर [illegible] कैलास [illegible] शिवं

[illegible] जगतं नवेन्दु [illegible] त्रिनेत्रं भजे ॥

ध्यायेन्नित्यं [illegible] रजतगिरिनिभं [illegible] चन्द्रावतंसं

रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीति [illegible]

पद्मासीनं समन्तात् [illegible] गणैर्व्याघ्र [illegible]

विश्वाद्यं विश्वबीजं [illegible] भयहरं पञ्चवक्त्रं [illegible]

मध्याह्नार्कसमप्रभं शशिधरं भीमाट्टहासो [illegible]

अक्षं पन्नगभूषणं शिखिशिखा श्मश्रु [illegible]

हस्ताब्जैस्त्रिशिखं [illegible]

[illegible]

[illegible] त्रिनेत्रं [illegible]

[illegible]

ॐ श्री आशुतोषशंकराय पार्वती प्राणनाथ
गिरिजाप्रियाय जगत्कल्याणकर्त्रे जगद्गुरवे
भस्माङ्गरागाय शिवाय नमो नमः॥ ॐ
ह्रीं [illegible]तपो[illegible] [illegible]कजटा [illegible]
[illegible]मौलिमुकुटं पूर्णेन्दु कोटिप्रभम्॥
[illegible] नागेन्द्र [illegible]
[illegible] [illegible]
[illegible]
[illegible]
[illegible] प्रियाय।
[illegible]
[illegible]

इत्यम्भोकल्पा द्रुम्याप्त तद्वैताद्भावयन्तं [illegible]
डम्भ्यां लौदध्यतं हृगाद्वल्पे [illegible] ल्यार्थ हन्तं पदम् ॥
अकल्पल्लाकर द्वयम्हृत्यं कैलास [illegible] शिवं
स्वच्छाम्भो जगतं नवेन्दु [illegible] ते त्रिनेत्रं भजे [illegible] ॥
[illegible] रजतगिरि [illegible] लं [illegible]
[illegible] मृगवरा [illegible]
[illegible] गौर्व्याप्त [illegible]
विश्वाद्ये विश्ववन्द्यं [illegible]
[illegible] श्रीम [illegible]
[illegible]
[illegible]
[illegible]
[illegible] त्रिनेत्र [illegible]
[illegible]

(श्रीशिवस्तोत्रम्)

नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पलकपालकशूलहस्तम्॥
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपम्॥ १॥
घण्टाकपालमणिमुण्डकपालखेट-
खट्वाङ्गशूलडमरुमभयं दधानम्॥
रक्ताम्बरमिन्दुशकलाभरणं त्रिनेत्रं
पञ्चाननाब्जमरुणं शुभमीशमीडे॥ [illegible]॥
[illegible]न्दुनिभं देवं सद्योजातं त्रिलोचनम्।
[illegible]नुमानीतिवरदं [illegible] चतुर्भुजम्।
[illegible] [illegible]॥
[illegible] [illegible]॥
[illegible] [illegible]॥
[illegible] [illegible]॥

असृक्षणं वरकुण्डिकामभयकरं चन्द्रीकलाविभ्रतं
गङ्गाम्भोविलसज्जटं दशभुजं वन्दे महेशं परम्॥

॥ॐ इति शुभमस्तु ॐ॥

अथ अष्टोत्तरशतनामात्मकं शिवस्तोत्रम्॥

ॐ नमः शिवाय॥

ॐ महादेवं विरूपाक्षं चन्द्रार्धकृतशेखरम्।
अमृतं शाश्वतं स्थाणुं नीलकण्ठं पिनाकिनम्॥१॥
वृषभाक्षं महाज्ञेयं पुरुषं सर्वकामदम्॥
कामारिं कामदहनं कामरूपं कपर्दिनम्॥
विरूपं गिरिशं भीमं स्रक्किणं रक्तवाससम्॥
योगिनं कालदहनं त्रिपुरघ्नं कपालिनम्॥
गूढव्रतं गुप्तमन्त्रं गम्भीरं भावगोचरम् [illegible]
अणिमादिगुणाधारं त्रिलोकैश्वर्य [illegible]
वीरं वीरहणं घोरं विरूपं मांसलं [illegible]

[illegible]

(श्रीशिवस्तोत्रम्)

त्रैलोक्यद्रावणं लुब्धं लुब्धकं यतसूदनम् ॥
...तिकान्तं सृतैश्च क्रान्तमत्तं [illegible]वासहम् ॥ ६ ॥
...जकृत्तिपरीधानं क्षुब्धं भुजङ्गभूषणम् ॥
...त्तालम्बं च वेतालं घोरं शाकिनिपूजितम् ॥ ७ ॥
अघोरं घोरदैत्यघ्नं घोरघोषं वनस्पतिम् ॥
भस्माङ्गं जटिलं शुद्धं भेरुण्डशतसेवितम् ॥ ८ ॥
...तेश्वरं भूतनाथं पञ्चभूताश्रितं खगम् ।
...पितं निष्ठुरं चण्डं चण्डीशं चण्डिकाप्रियम् ॥ ९ ॥
...तुण्डं गरुत्मन्तं निस्त्रिंशं शवभोजनम् ॥
...लेलिहानं महारौद्रं मृत्युं मृत्योरगोचरम् ॥ १० ॥
...मृत्योर्मृत्युं महासेनं श्मशानारण्यवासिनम् ।
...विरागं रागाढ्यं वीतरागं शतार्चिषम् ॥ ११ ॥
...लं [illegible] नागचाजिनम् ॥

... [illegible] तुकम् ॥ १२ ॥

अर्धनारीश्वरं भानुं भानुकोटिशतप्रभम्॥
यज्ञं यज्ञपतिं रुद्रमीशानं वरदं शिवम्॥ १३॥
अष्टोत्तरशतं ह्येतन्मूर्तीनां परमात्मनः॥
शिवस्य दानवोध्यायन् मुक्तस्स्यान्महाभयात्॥
॥ १४॥

इति श्रीशिवस्तोत्रः सम्पूर्णः शिवाय
अस्तु॥

अथ श्रीशिवकवचम्॥

ॐ श्रीशिवाय अमोघाय शिवकवचाय परम-
गुह्याय, असाधारणीयाय सर्वपापहर्त्रे सर्वा-
अमङ्गलविघ्नबाधाहर्त्रे, परमपवित्राय,
जयप्रदाय, सम्पूर्णविपत्तिविनाशकाय
[illegible]
नमो नमः॥

अस्य श्रीशिवकवचस्तोत्रमन्त्रस्य ब्रह्मा
ऋषिः अनुष्टुप् छन्दः श्री[illegible]
रुद्रो देवता, [illegible]

(श्रीशिवकवचम्)

श्रीं ह्रीं क्लीं बीजम्, सदाशिवप्रत्यर्थे शिवकव-
चस्तोत्रजपे विनियोगः॥

ॐ ब्रह्मऋषये नमः शिरसि, अनुष्टुप् छन्दसे
नमः मुखे, श्रीसदाशिवरुद्रदेवतायै नमः
हृदि, ह्रीं शक्तये नमः पादयोः, वं कीलका-
य नमः नाभौ, श्रीं ह्रीं क्लीं इति बीजाय
नमः गुह्ये, विनियोगाय नमः सर्वाङ्गे॥

अथ करन्यासः॥

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रीं
रां सर्वशक्तिधाम्ने ईशानात्मने अङ्गुष्ठाभ्यां नमः॥
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ नं रिं
नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां नमः॥
ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मं रुं
अनादिशक्तिधाम्ने अघोरात्मने मध्यमाभ्यां

(श्रीशिवकवचम्)

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ शिं शैं स्वतन्त्र शक्तिधाम्ने वामदेवात्मने अनामिकाभ्यां हुम्॥

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ वां रैं अलुप्तशक्तिधाम्ने सद्योजातात्मने कनिष्ठिकाभ्यां वौषट्॥

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ यं रः अनादि शक्तिधाम्ने सर्वात्मने करतलकरपृष्ठाभ्यां फट्॥

अथ हृदयाद्यङ्गन्यासः॥

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रीं रां सर्वशक्तिधाम्ने ईशानात्मने हृदयाय नमः॥

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ नं रीं नित्यतृप्तिधाम्ने तत्पुरुषात्मने शिरसे स्वाहा॥

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मं [illegible] अनादिशक्तिधाम्ने अघोरात्मने शिखायै वषट्॥

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ [illegible] स्वतन्त्रशक्तिधाम्ने वामदेवात्मने [illegible]॥

ॐ नमो भगवते [illegible]

अलुप्तशक्तिधाम्ने [illegible]

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ यं रः
अनादिशक्तिधाम्ने सर्वात्मने भक्ताय फट्॥

अथ ध्यानम्।

वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिंदमम्॥
सहस्रकरमत्युग्रं वन्दे शम्भुमुमापतिम्॥ ॐ॥

ऋषभ उवाच

अथापरं सर्वपुराणगुह्यं
निःशेषपापौघहरं पवित्रम्॥
जयप्रदं सर्वविपद्विमोचनं
वक्ष्यामि शैवं कवचं हिताय ते॥
नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम्।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्॥
शुचौ देशे समासीनो यथावत्कल्पितासनः।

जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम्॥

हृत्पुण्डरीकान्तरसंनिविष्टं
स्वतेजसा व्याप्तनभोऽवकाशम् ॥
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं
ध्यायेत्परानन्दमयं महेशम् ॥३॥

ध्यानावधूताखिलकर्मबन्ध-
श्चिरं चिदानन्दनिमग्नचेताः ॥
षडक्षरन्याससमाहितात्मा
शैवेन कुर्यात्कवचेन रक्षाम् ॥४॥

मां पातु देवोऽखिलदेवतात्मा
संसारकूपे पतितं गभीरे ॥
तन्नाम दिव्यं वरमन्त्रमूलं
धुनोतु मे सर्वमघं हृदिस्थम् ॥५॥

सर्वत्र मां रक्षतु विश्वमूर्ति-
र्ज्योतिर्मयानन्दघनश्चिदात्मा

अघोरजीवानुदधिरेकः
स ईश्वरः पातु भयादशेषात्॥६॥
यो भूस्वरूपेण बिभर्ति विश्वं
पायात्स भूमेर्गिरिशोऽष्टमूर्तिः॥
योऽपां स्वरूपेण नृणां करोति
संजीवनं सोऽवतु मां जलेभ्यः॥७॥
कल्पावसाने भुवनानि दग्ध्वा
सर्वाणि यो नृत्यति भूरिलीलः॥
स कालरुद्रोऽवतु मां दवाग्ने-
र्वात्यादिभीतेरखिलाच्च तापात्॥८॥
प्रदीप्तविद्युत्कनकावभासो
विद्यावराभीतिकुठारपाणिः॥
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः
प्राच्यां स्थितो रक्षतु मामजस्रम्॥

कुठारवेदाङ्कुशपाशशूल-
　　कपालढक्काक्षगुणान् दधानः ।।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः
　　पायादघोरो दिशि दक्षिणस्याम् ।।१०।।
कुन्देन्दुशङ्खस्फटिकावभासो
　　वेदाक्षमालावरदाभयाङ्कः ।।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः
　　सद्योऽधिजातोऽवतु मां प्रतीच्याम् ।।११।।
वराक्षमालाभयटङ्कहस्तः
　　सरोजकिञ्जल्कसमानवर्णः ।।
त्रिलोचनश्चारुचतुर्मुखो मां
　　पायादुदीच्यां दिशि वामदेवः ।।१२।।
वेदाभयेष्टाङ्कुशटङ्कपाश

　　कपालढक्काक्षरशूलपाणिः ।।

 (श्रीशिवकवचम्)

शितद्युतिः पंचमुखोऽवतान्मा -
मीशान ऊर्ध्वं परमप्रकाशः॥१३॥
दृष्टीर्नमव्यान्मम चन्द्रमौलि -
र्भालं ममाव्यादथ भालनेत्रः।
नेत्रे ममाव्याद्भगनेत्रहारी
नासां सदा रक्षतु विश्वनाथः॥१४॥
पायाच्छ्रुती मे श्रुतिगीतकीर्तिः
कपोलमव्यात् सततं कपाली॥
वक्त्रं सदा रक्षतु पंचवक्त्रो
जिह्वां सदा रक्षतु वेदजिह्वः॥१५॥
कंठं गिरीशोऽवतु नीलकण्ठः
पाणिद्वयं पातु पिनाकपाणिः॥
दोर्मूलमव्यान्मम धर्मबाहु -

र्वक्षःस्थलं दक्षमखान्तकोऽव्यात्

मध्योदरं पातु गिरीन्द्रधन्वा
मध्यं ममाव्यान्मदनान्तकारी।
हेरम्बतातो मम पातु नाभिं
पायात्कटीधूर्जटिरीश्वरो मे॥१७॥
ऊरुद्वयं पातु कुबेरमित्रो
जानुद्वयं मे जगदीश्वरोऽव्यात्॥
जङ्घायुगं पुंगवकेतुरव्यात्
पादौ ममाव्यात्सुरवन्द्यपादः॥१८॥
महेश्वरः पातु दिनादियामे
मां मध्ययामेऽवतु वामदेवः॥
त्रियम्बकः पातु तृतीययामे
वृषध्वजः पातु दिनान्त्ययामे॥१९॥
पायान्निशादौ शशिशेखरो मां
गङ्गाधरो रक्षतु मां निशीथे।

 (श्रीशिवकवचम्)

गौरीपतिः पातु निशावसाने
मृत्युंजयो रक्षतु सर्वकालम् ॥२०॥
अन्तःस्थितं रक्षतु शंकरो मां
स्थाणुः सदा पातु बहिःस्थितं माम् ॥
तदन्तरे पातु पतिः पशूनां
सदाशिवो रक्षतु मां समन्तात् ॥२१॥
तिष्ठन्तमव्याद्भुवनैकनाथः
पायाद् व्रजन्तं प्रमथाधिनाथः ॥
वेदान्तवेद्योऽवतु मां निषण्णं
मामव्ययः पातु शिवः शयानम् ॥२२॥
मार्गेषु मां रक्षतु नीलकण्ठः
शैलादिदुर्गेषु पुरत्रयारिः ॥
अरण्यवासादि महाप्रवासे
पायान्मृगव्याध उदारशक्तिः ॥२३॥

कल्पान्तकाटोपपटुप्रकोपः
स्फुटाट्टहासोच्चलिताण्डकोशः ।।
घोरारिसेनार्णवदुर्निवार-
महाभयाद् रक्षतु वीरभद्रः ।। २४ ।।
पत्त्यश्वमातङ्गघटावरूथ-
सहस्रलक्षायुतकोटिभीषणम् ।।
अक्षौहिणीनां शतमाततायिनां
छिन्द्यान्मृडो घोरकुठारधारया ।। २५ ।।
निहन्तु दस्यून् प्रलयानलार्चि-
र्ज्वलत्त्रिशूलं त्रिपुरान्तकस्य ।।
शार्दूलसिंहर्क्षवृकादिहिंस्रान्
संत्रासयत्वीशधनुः पिनाकम् ।। २६ ।।
दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्य-
दुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि

उत्पाततापविषभीतिमहाग्रहार्ति-
व्याधींश्च नाशयतु मे जगतामधीशः ॥२७॥
ॐ नमो भगवते सदाशिवाय
सकलतत्त्वात्मकाय सकलतत्त्वविहाराय सक-
ललोकैककर्त्रे सकललोकैकभर्त्रे सकललो-
कैकहर्त्रे सकललोकैकगुरवे सकललोकैकसा-
क्षिणे सकलनिगमगुह्याय सकलवरदा-
य सकलदुरितार्तिभञ्जनाय सकलजगदभयं-
कराय सकललोकैकशंकराय शशाङ्कशेख-
राय शाश्वतनिजाभासाय निर्गुणाय निरुपमा-
य नीरूपाय निराभासाय निरामयाय निष्प्र-
पञ्चाय निष्कलङ्काय [illegible] निःसङ्-
गाय निर्मलाय [illegible] नित्यरूपविभवाय
निरुपमविभवाय [illegible] नित्यशु-

परमब्रह्माण्डप्रकाण्डतेजोरूपाय जय जय
महारुद्र महारौद्र भद्रावतार दुःखदावदारण
महाभैरव कालभैरव कल्पान्तभैरव कपालमाला-
धर खट्वाङ्ग खड्ग चर्म पाशाङ्कुश डमरु शूल
चाप बाण गदा शक्ति भिन्दिपाल तोमर मुसल मु-
द्गर पट्टिश परशु परिघ भुशुण्डी शतघ्नी चक्रा-
द्यायुध भीषणकर सहस्रमुख दंष्ट्राकराल
विकटाट्टहास विस्फारित ब्रह्माण्डमण्डल
नागेन्द्रकुण्डल नागेन्द्रहार नागेन्द्रवलय नागेन्द्र-
चर्मधर मृत्युंजय त्र्यम्बक त्रिपुरान्तक विरू-
पाक्ष विश्वेश्वर विश्वरूप वृषभवाहन [illegible]
[illegible] विश्वतोमुख सर्वतो रक्ष [illegible]
ज्वल ज्वल महामृत्युभयं [illegible]
[illegible] [illegible]

[illegible]

मम शत्रूनुच्चाटयोच्चाटय शूलेन विदारय
विदारय कुठारेण भिन्धि भिन्धि खड्गेन
छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपो-
थय मुसलेन निष्पेषय निष्पेषय बाणैः
संताडय संताडय रक्षांसि भीषय भीषय
भूतानि विद्रावय विद्रावय कूष्माण्डवेता-
लमारीगणब्रह्मराक्षसान् संत्रासय संत्रासय
ममाभयं कुरु कुरु वित्रस्तं मामाश्वासयाश्वा-
सय नरकभयान्मामुद्धारयोद्धारय संजीवय
संजीवय क्षुत्तृड्भ्यां मामाप्याययाप्यायय
दुःखातुरं मामानन्दयानन्दय शिवकवचे-
न मामाच्छादयाच्छादय त्र्यम्बक सदाशिव
नमस्ते नमस्ते

ऋषभ उवाच

इत्येतत्कवचं शैवं वरदं व्याहृतं मया॥
सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम्॥ २८॥
यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम्॥
न तस्य जायते क्वापि भयं शम्भोरनुग्रहात्॥
क्षीणायुर्मृत्युमापन्नो महारोगहतोऽपि वा।
सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति।
सर्वदारिद्र्यशमनं सौमङ्गल्यविवर्धनम्॥
यो धत्ते कवचं शैवं स देवैरपि पूज्यते॥
महापातकसंघातैर्मुच्यते चोपपातकैः॥
देहान्ते शिवमाप्नोति शिवच [illegible]
त [illegible] श्रद्धया वत्स शैवं कवच [illegible]
पार [illegible]
[illegible]

[illegible] सूत [illegible]

(श्रीमहामृत्युंजयकवचम्)

अस्य श्री महामृत्युंजयकवचस्य ब्रह्मा ऋषि अनुष्टुप् छन्दः पार्वतीपति मृत्युंजयो देवता देहारोग्यबलायुष्ये विनियोगः

ॐ श्री पार्वतीपतये दक्षयज्ञविनाशनाय चन्द्रशेखराय नीलकण्ठाय महामृत्युंजयाय नमः॥

श्री देव्युवाच

भगवन् सर्वधर्मज्ञ सृष्टिस्थितिलयात्मक।
मृत्युंजयस्य देवस्य कवचं मे प्रकाशय॥१॥

श्रीईश्वर उवाच।

शृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम्।
मार्कण्डेयोऽपि यद्धृत्वा चिरञ्जीवी व्यजायत॥
तथैव सर्वदिक्पाला अमरत्वमवाप्नुयुः॥
कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतम्॥२॥
मृत्युंजयः समुद्दिष्टो देवता पार्वतीपतिः।
देहारोग्यबलायुष्ये विनियोगः प्रकीर्तितः॥
ॐ त्र्यम्बकं मे शिरः पातु [illegible] मे व्रजतो [illegible]॥
[illegible] ॥३॥

नाभिमूर्वोरूकमिव पातु मां पार्वतीपतिः॥
बन्धनादूरुयुग्मं मे पातु कामाङ्गशासनः॥६॥
श्रीसेजानुयुग्मं पातु दक्षयज्ञविनाशनः॥
जङ्घायुग्मं च गुह्यीय पातु मां चन्द्रशेखरः॥७॥
गुल्फतावु पदद्वन्द्वं पातु सर्वेश्वरो हरः।
अंसौ मे श्रीशिवः पातु नीलकण्ठश्च पार्श्वयोः॥८॥
ऊर्ध्वमेव सदा पातु [illegible] सूर्याग्निलोचनः॥
अधः पातु सदा शम्भुः सर्वापद्विनिवारणः॥९॥
वारुण्यामर्धनारीशो वायव्यां पातु शंकरः।
कपर्दी पातु कौबेर्यामैशान्यां ईश्वरोऽवतु॥१०॥
ईशानः सलिले पायादघोरः पातु [illegible]
अन्त[illegible] [illegible] सद्योजातो[illegible]
भी[illegible] [illegible] पातु भोजने नीललोहितः।
गमने त्र्यम्बकः पातु सर्वकार्ये [illegible]

[illegible]पेत्र सर्वदेहं मे सदा मृत्युंजयोऽवतु ॥
[illegible]ति ते कथितं दिव्यं कवचं सर्वकामदम् ॥१३॥
सर्वरक्षाकरं सर्वग्रहपीडानिवारणम् ॥
[illegible]: स्वप्ननाशनं पुण्यमायुरारोग्यदायकम् ॥१४॥
[illegible]संध्यं यः पठेदेतन्मृत्युस्तस्य न विद्यते ॥
लिखितं भूर्जपत्रे तु यस्त्विदं मे व्यधारयेत् ॥१५॥
[illegible] दृष्ट्वैव पलायन्ते भूतप्रेतपिशाचकाः ॥
डाकिन्यश्चैव योगिन्यः [illegible] ॥१६॥
[illegible]लग्रहादिदोषा हि नश्यन्ति तस्य दर्शनात् ॥
[illegible]पग्रहाश्चैव मारीभयं चौराभिचारिणः ॥१७॥
इदं कवचमायुष्यं कथितं तव सुन्दरि ॥
[illegible] ॥१८॥
इति श्रीमहा[illegible]

[illegible] सम्पूर्णम्: [illegible]

अथ श्रीजगद्विलक्षणस्य सूर्यकवचस्य प्रजापतिः
ऋषि गायत्री छन्दः दिवाकरो देवता आधि व्याधा-
ने सौन्दर्ये च विनियोगः॥

ॐ सर्वरोगहराय सर्वदेवनमस्कृताय भास्कराय
प्रभाकराय मार्तण्डाय श्रीसूर्याय नमो नमः।

बृहस्पतिरुवाच

इन्द्र शृणु प्रवक्ष्यामि कवचं परमाद्भुतम्।
यद् धृत्वा मुनयः पूता जीवन्मुक्ताश्च भारते॥
कवचं बिभ्रतो व्याधिर्न याति हं निर्मितम्।
यथा इन्द्रावैनतेयं पलायन्ते भुजङ्गमाः यथा
भुजाय गुरुमकाय स्वर्णिमाय प्रकाशयेत्।
खलाय परद्रोहाय दत्वा मृत्युमवाप्नुयात्।
जगद्विलक्षणस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च गायत्री देवो दिनकरः स्वयम्।
आधिव्याध्यो सौन्दर्ये विनियोगः प्रकीर्तितः।
सद्यो रोगहरं स्तम्भं सर्वपापप्रणाशनम्।
ॐ क्लीं ह्रीं श्रीं श्रीसूर्याय सहस्रांशुर्मे शिरः पातु

॥ २॥

श्रीसूर्यकवचम्॥

अष्टादशाक्षरो मंत्रः कपालं मे सदावतु।
ॐ ह्रीं ह्रीं श्रीं श्रीं सूर्याय स्वाहा मे पातु नासिकाम्॥
चक्षुर्मे पातु सूर्यश्च तारकां च विकर्त्तनः।
भास्करो मेऽधरं पातु दन्तान्दिनकरः सदा॥७॥
प्रचण्डः पातु गण्डं मे मार्तण्डः कर्णमेव च॥
मिहिरश्च सदा स्कन्धौ पूषा जङ्घे सदावतु॥८॥
वक्षः पातु रविः शश्वन्नाभिं सूर्यः स्वयं सदा॥
कङ्कालं मे सदा पातु सर्वदेवनमस्कृतः॥९॥
करौ पातु सदा ब्रध्नः पातु पादौ प्रभाकरः।
विभाकरो मे सर्वाङ्गं पातु सततमीश्वरः॥१०॥
इति ते कथितं वत्स कवचं सुमनोहरम्।
जगद्विलक्षणं नाम त्रिजगत्सु सुदुर्लभम्॥११॥
पुरा दत्तं च मनवे पुलस्त्येन पुष्करे तु वा।

मया दत्तं च तस्य तव वत्से कस्मै न देहि मां॥

व्याधितो मुच्यसे त्वं कवचस्य प्रसादतः।
भवानरोगी श्रीमांश्च भविष्यति न संशयः॥१४॥
लक्षवर्षहविष्येण यत्फलं लभते नरः।
तत्फलं लभते नूनं कवचस्यास्य धारणात्॥१५॥
इदं कवचमज्ञात्वा यो मूढो भास्करं भजेत्॥
दशलक्षप्रजप्तोऽपि मन्त्रः सिद्धो न जायते॥१६॥

इति श्रीब्रह्मवैवर्ते इन्द्रं प्रति गुरुणा
उक्तः श्रीसूर्यकवचः सम्पूर्णः सपरि-
वारः सायुधः सवाहनः साङ्गः प्रीयतां
प्रीतोऽस्तु॥

॥ इति शुभं भूयात्॥

॥ ॐ॥

॥

अथ श्रीशिवकृतं दुर्गास्तोत्रम्॥

ॐ श्रीदुर्गार्तिनाशिन्यै विष्णुमायायै नारायण्यै जगदम्बिकायै मायायै श्रीदुर्गायै नमो नमः॥

रक्ष रक्ष महादेवि दुर्गे दुर्गतिनाशिनि।

मां भक्तमनुरक्तं च शत्रुग्रस्तं कृपामयि॥१॥

विष्णुमाये महाभागे नारायणि सनातनि।

ब्रह्मस्वरूपे परमे नित्यानन्दस्वरूपिणि॥२॥

त्वं च ब्रह्मादिदेवानामम्बिके जगदम्बिके।

त्वं साकारे च गुणतो निराकारे च निर्गुणात्॥३॥

मायया पुरुषस्त्वं च मायया प्रकृतिः स्वयम्।

तयोः परं ब्रह्म परं त्वं बिभर्षि सनातनि॥[illegible]॥

वेदानां जननी त्वं च सावित्री च परात्परा॥

[illegible] च महालक्ष्मीः सर्वसम्पत्स्वरूपिणी॥५॥

[illegible]लक्ष्मीश्च क्षीरोद कामिनी शेषशायि[illegible]।

[illegible] लक्ष्मी [illegible] लक्ष्मीश्च [illegible]॥

[illegible] गृहदेवता।

[illegible]विधायिनी॥७॥

।अथ दुर्गास्तोत्रम्।

गोलोके च स्वयं राधा श्रीकृष्णस्यैव वक्षसि। ॐ
गोलोकाधिष्ठिता देवी वृन्दावनवने वने॥ ६॥
रासाधिष्ठातृदेवि त्वं ब्राह्मणश्च सरस्वती।
प्राणानामधिदेवी त्वं कृष्णस्य परमात्मनः॥ ८॥
ॐ
~~गोलोके च स्वयं राधा~~ वृन्दावनविनोदिनी।
श्रीरासमण्डले रम्या
शतशृङ्गाधिदेवी त्वं नाम्ना चित्रावलीति च॥ ९॥
दक्षकन्या कुत्र कल्पे कुत्र कल्पे च शैलजा।
देवमातादितिस्त्वं च सर्वाधारा वसुन्धरा॥ १०॥
त्वमेव गङ्गा तुलसी त्वं च स्वाहा स्वधा सती।
त्वदंशांशांशकलया सर्वदेवादियोषितः॥ ११॥
स्त्रीरूपे चापि पुरुषे देवि त्वं च नपुंसके।
वृक्षाणां वृक्षरूपा त्वं सृष्टौ चाङ्कुररूपिणी॥
वह्नौ च दाहिकाशक्तिर्जले शैत्यस्वरूपिणी।
सूर्ये तेजःस्वरूपा च प्रभारूपा च संततम्॥
गन्धरूपा च भूमौ च आकाशे शब्दरूपिणी।
शोभास्वरूपा चन्द्रे च ...

दक्षो दृष्टिस्वरूपा त्वं पालने परिपालिका।
महामारी च संहारे जले च जलरूपिणी॥ १६॥
क्षुत्त्वं दया त्वं निद्रा त्वं तृष्णा त्वं बुद्धिरूपिणी।
तुष्टिस्त्वं चापि पुष्टिस्त्वं श्रद्धा त्वं च क्षमा स्वयम्।
शान्तिस्त्वं च स्वयं भ्रान्तिः कान्तिस्त्वं कीर्तिरेव च॥
लज्जा त्वं च तथा माया भुक्तिमुक्तिस्वरूपिणी॥ १७॥
सर्वशक्तिस्वरूपा त्वं सर्वसम्पत्प्रदायिनी।
वेदैः निर्वचनीया त्वं त्वां न जानाति कश्चन॥ १८॥
सहस्रवक्त्रस्त्वां स्तोतुं न च शक्तः सुरेश्वरि।
वेदा न शक्ताः को विद्वान् न च शक्ता सरस्वती॥
स्वयं विधाता शक्तो न न च विष्णुः सनातनः।
किं स्तौमि पञ्चवक्त्रेण रणत्रस्तो महेश्वरि॥
कृपां कुरु महामाये मम शत्रुक्षयं कुरु॥ २१॥
[illegible] शुभमायास्तु ॥

ॐ अस्य श्रीब्रह्माण्डविजयस्य श्रीदुर्गाकवचस्य प्रजापतिः ऋषिः गायत्री छन्दः दुर्गतिनाशिनी देवी देवता धर्मार्थकाममोक्षार्थे ब्रह्माण्डविजये च विनियोगः॥

श्रीनारायण उवाच

शृणु नारद वक्ष्यामि दुर्गायाः कवचं शुभम्।
श्रीकृष्णेनैव यद्दत्तं गोलोके ब्रह्मणे पुरा॥
ब्रह्मा त्रिपुरसंग्रामे शंकराय ददौ पुरा।
जघान त्रिपुरं रुद्रो यद्धृत्वा भक्तिपूर्वकम्॥
हरो ददौ गौतमाय पद्माक्षाय च गौतमः।
यतो बभूव पद्माक्षः सप्तद्वीपेश्वरो जयी॥
यद्धृत्वा पठनाद् ब्रह्मा ज्ञानवान् शक्तिमान् भुवि।
शिवो बभूव सर्वज्ञो योगिनां च गुरुर्यतः।
शिवतुल्यो गौतमश्च बभूव मुनिसत्तमः॥

 श्रीदुर्गाकवचम्॥

ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः॥
ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी॥ ब्र
ब्रह्माण्डविजये चैव विनियोगः प्रकीर्तितः॥
पुण्यतीर्थं च महतां कवचं परमाद्भुतम्॥ ६॥
ॐ ह्रीं दुर्गतिनाशिन्यै स्वाहा मे पातु मस्तकम्।
ॐ ह्रीं मे पातु कपालं च ॐ ह्रीं श्रीमिति लोचने। ७॥
पातु मे कर्णयुग्मं च ॐ दुर्गायै नमः सदा॥
ॐ ह्रीं श्रीमिति नासां मे सदा पातु च सर्वतः॥ ८॥
ह्रीं श्रीं ह्रूमिति दन्तानि पातु क्लीमोष्ठयुग्मकम्॥
ॐ क्रीं क्रीं पातु कण्ठं च दुर्गे रक्षतु गण्डकम्॥ ९॥
स्कन्धं दुर्गविनाशिन्यै स्वाहा पातु निरन्तरम्।
ॐ [illegible] दुर्गतिनाशिन्यै स्वाहा मे पातु सर्वतः॥ १०॥
[illegible] सदावतु॥
[illegible] पातु सर्वतः॥ ११॥

ॐ ह्रीं दुर्गायै स्वाहा च हृदयं पातु मे सदा ॥
ॐ ह्रीं दुर्गायै स्वाहा च सर्वाङ्गं मे सदावतु॥ २॥
प्राच्यां पातु महामाया आग्नेय्यां पातु कालिका।
दक्षिणे दक्षकन्या च नैरृत्यां शिवसुन्दरी॥ ३॥
पश्चिमे पार्वती पातु वाराही वारुणे सदा।
कुबेरमाता कौबेर्यामैशान्यामीश्वरी सदा॥ ४॥
ऊर्ध्वे नारायणी पातु अम्बिकाधः सदावतु।
ज्ञाने ज्ञानप्रदा पातु स्वप्ने निद्रा सदावतु॥ ५॥
इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम्।
ब्रह्माण्डविजयं नाम कवचं परमाद्भुतम्।
सुस्नातः सर्वतीर्थेषु सर्वयज्ञेषु [illegible]
सर्वव्रतोपवासे च तत् फलं लभते [illegible]
[illegible]
सर्वे [illegible]

श्रीदुर्गाकवचम् ॥

स च त्रैलोक्यविजयी सर्वशत्रुप्रमर्दकः ॥
इदं कवचमज्ञात्वा भजेद् दुर्गतिनाशिनीम् ॥१९॥
शतलक्षप्रजप्तोऽपि
न मन्त्रः सिद्धिदायकः ॥२०॥
कवचं कथिरखं वत्स
उक्तं नारद सुन्दरम् ॥
यस्मै कस्मै न दातव्यं
गोपनीयं सुदुर्लभम् ॥२१॥
इति श्रीदुर्गाकवचः सम्पूर्णः सपरिवारः
[illegible]नः साङ्गः सायुधः प्रीयतां
प्रीतोऽस्तु ॥

॥ ॰ ॥

श्रीमहागायत्रीकवचम्॥

अस्य श्रीमहागायत्रीकवचस्य ब्रह्माविष्णुमहेश्वरा: ऋषय: ऋग्यजुःसामाथर्वा: छन्दांसि ब्रह्मरूपा परमा कला गायत्री देवता तद्बीजम् भर्ग इति शक्तिः धियः इति कीलकं धर्मार्थकाममोक्षार्थे जपे(पाठे वा) विनियोगः। श्रीमहागायत्र्यै नमो नमः॥

श्रीनारायण उवाच

अस्त्येकं परमं गुह्यं गायत्रीकवचं तथा।
पठनाद्धारणान्मर्त्यः सर्वपापैः प्रमुच्यते॥१॥
सर्वकामानवाप्नोति देवीरूपश्च जायते।
गायत्रीकवचस्यास्य ब्रह्मविष्णुमहेश्वराः॥२॥
ऋषयो ऋग्यजुःसामाथर्वच्छन्दांसि नारद।
ब्रह्मरूपा देवतोक्ता गायत्री परमा कला॥३॥
तद्बीजम् भर्ग इत्येषा शक्तिरुक्ता मनीषिभिः।
कीलकं च धियः प्रोक्तं मोक्षार्थे विनियोजनम्॥

(६६) श्रीमहागायत्रीकवचम्॥

चतुर्भिर्हृदयं प्रोक्तं त्रिभिर्वर्णैः शिरः स्मृतम्॥
चतुर्भिः स्याच्छिखा पश्चात्त्रिभिस्तु कवचं स्मृतम्॥५॥
चतुर्भिर्नेत्रमुद्दिष्टं चतुर्भिः स्यात्तदस्त्रकम्॥
अथ ध्यानं प्रवक्ष्यामि साधकाभीष्टदायकम्॥६॥

॥ध्यानम्॥
ॐ
मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्यु-
क्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम्॥
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गुणं शंखं
चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे॥७॥
गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे।
ब्रह्मसंध्या तु मे पश्चादुत्तरायां सरस्वती॥८॥
पार्वती मे दिशं रक्षेत्पावकीं जलशायिनी॥
यातुधानी दिशं रक्षेद्यातुधानभयंकरी॥९॥
[illegible] [illegible]विलासिनी॥
[illegible] [illegible] रुद्ररूपिणी॥१०॥

...र्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥
...वं दशदिशो रक्षेत्सर्वांगं भुवनेश्वरी ॥११॥
...त्पदं पातु मे पादौ जङ्घे मे सवितुः पदम् ॥
वरेण्यं कटिदेशे तु नाभिं भर्गस्तथैव च ॥१२॥
देवस्य मे तद्धृदयं धीमहीति च गल्लयोः ॥
धियः पदं च मे नेत्रे यः पदं मे ललाटकम् ॥१३॥
नः पातु पदं मूर्ध्नि शिखायां मे प्रचोदयात् ॥
तत्पदं पातु मूर्धानं हकारः पातु भालकम् ॥१४॥
चक्षुषी तु विकाराणीस्तुकारस्तु कपोलयोः ॥
नासापुटं वकाराणी रेकारस्तु मुखे तथा ॥१५॥
णीकार ऊर्ध्वमोष्ठन्तु यकारस्त्वधरोष्ठकम् ॥१६
...ास्यमध्ये भकाराणी गोकारश्चुबुके तथा ॥
देकारः कण्ठदेशे तु वकारः स्कन्धदेशकम् ॥

स्यकारो दक्षिणहस्ते धीकारो वामहस्तकम् ॥१७॥

श्रीमहागायत्रीकवचम् ॥

रकारो हृदयं रक्षेत् हिकारऽ उदरे तथा॥
धिकारो नाभिदेशे तु योकारस्तु कटिं तथा ॥१८॥
गुह्यं रक्षतु योकार ऊरू द्वौ नः पदाक्षरम् ॥
प्रकारो जानुनी रक्षे च्चोकारो जंघदेशकम् ॥१९॥
दकारं गुल्फदेशे तु यकारः पदयुग्मकम् ॥
तकार व्यंजनं चैव सर्वांगं मे सदाऽवतु ॥ २०॥
इदं तु कवचं दिव्यं बाधाशतविनाशनम् ॥
चतुःषष्टिकलाविद्या दायकं मोक्षकारकम् ॥ २१॥
मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति ॥
पठनाच्छ्रवणाद्वापि गांसहस्रफलं लभेत् ॥२२॥
ॐ इति श्रीदेवीभागवते महापुराणे द्वादशा-
स्कंधे महागायत्रीकवचः सम्पूर्णः सर्वाकारः
सवाहनः साङ्गः सायुधः प्रीयतां
प्रीताऽस्तु ॥

ॐ श्री नारद उवाच ॥

भगवन्देवदेवेश भूतभव्यजगत्प्रभो ॥
कवचं च श्रुतं दिव्यं गायत्रीमंत्रविग्रहम् ॥ १ ॥
अधुना श्रोतुमिच्छामि गायत्रीहृदयं परम् ॥
यद्धारणाद्भवेत्पुण्यं गायत्रीजायतेऽखिलम् ॥ २ ॥

श्री नारायण उवाच

देव्याश्च हृदयं प्रोक्तं नारदाथर्वणस्फुटम् ॥
तदेवाहं प्रवक्ष्यामि रहस्यातिरहस्यकम् ॥ ३ ॥
विराड्रूपां महादेवी गायत्री वेदमातरम् ॥
ध्यात्वा तस्यास्त्वथांगेषु ध्यायेदेताश्च देवता ॥ ४ ॥
पिण्डब्रह्माण्डयोरैक्याद्भावयेत्स्वतनौ तथा ॥
देवीरूपे निजे देहे तन्मयत्वाय साधकः ॥ ५ ॥
नादेवोऽभ्यर्चयेद्देवमिति वेदविदो विदुः ॥
ततोऽभेदाय काये स्वे भावयेद्देवता इमाः ॥ ६ ॥

नथ तत्त्वं प्रवक्ष्यामि तन्मयत्वं यथा भवेत्।
गायत्रीहृदयस्याऽस्याऽप्यहमेव ऋषिः स्मृतः॥७॥
गायत्रीछन्द उदिष्टं देवतापरमेश्वरी॥
देवीं कृत्वा प्रकारेण कुर्यादङ्गानि षट् क्रमात्॥८॥
आसने विजने देवि ध्यायेदेकाग्रमानसः॥
अथार्थन्यासः: द्यौर्मूर्ध्नि दैवतम्। दन्तपंक्तावश्विनौ। उभे संध्ये चौष्ठौ। मुखमग्निः। जिह्वा सरस्वती। ग्रीवायां तु बृहस्पतिः। स्तनयोर्वसवोऽष्टौ। बाह्वोर्मरुतः। हृदये पर्जन्यः। आकाशमुदरम्। नाभावन्तरिक्षम्। कट्योरिन्द्राग्नी॥
जघने विज्ञानघनः प्रजापतिः। कैलासमलये ऊरू। विश्वेदेवा जान्वोः। जंघायां कौशिकः। गुह्यमयने। ऊरू पितरः। पादौ पृथिवी। वनस्पतयोऽङ्गुलीषु। ऋषयो रोमाणि॥
नखानि मुहूर्तानि [illegible] ग्रहाः॥

षड्‍ मासमृतवः। संवत्सरा वै निमिषम्। अहोरा-
त्रावादित्यश्चन्द्रमाः। प्रवरां दिव्यां गायत्रीं सह-
स्रनेत्रां शरणमहं प्रपद्ये। ॐ तत्सवितुर्वरेण्याय
नमः। ॐ तत्पूर्वजयाय नमः। तत्प्रातरादित्या
य नमः। तत्प्रातरादित्यप्रतिष्ठाय नमः। प्रातरधी
यानो रात्रिकृतं पापं नाशयति। सायमधी
यानो दिवसकृतं पापं नाशयति॥ सायं प्रात-
रधीयानो अपापो भवति। सर्वतीर्थेषु स्नातो
भवति। सर्वैर्देवैर्ज्ञातो भवति। अवाच्यवच
नात्पूतो भवति। अभक्ष्यभक्षणात्पूतो भवति।
अभोज्यभोजनात्पूतो भवति। अचोष्यचोष
णात्पूतो भवति। दुष्ट असाध्यसाधनात्पूतो
भवति। दुष्टप्रतिग्रहशतसहस्रात्पूतो भवति।
सर्वप्रतिग्रहात्पूतो भवति। पंक्तिदूषणात्पू

तो भवति। अनृतवचनात्पूतो भवति॥

अथाऽ ब्रह्मचारी ब्रह्मचारी भवति। अनेन हृदयेना धीतेन क्रतुसहस्रेणेष्टं भवति। षष्टिशतसहस्रगायत्र्या जप्यानि फलानि भवन्ति। अष्टौ ब्राह्मणान्सम्यग्ग्राहयेत्। तस्य सिद्धिर्भवति। य इदं नित्यमधीयानो ब्राह्मणः प्रातः शुचिः सर्वपापैः प्रमुच्यत इति॥ ब्रह्मलोके महीयते। इत्याह भगवान् श्रीनारायणः॥

इति श्रीदेवीभागवते महापुराणे द्वादशस्कंधे गायत्रीहृदयं सम्पूर्णं समाप्तम्॥ॐ॥

इति शुभायाऽस्तु॥


॥ॐ॥

स्वयंचं श्रीइन्द्राक्षीकवचम्।

ॐ श्रीमहागणेशाय नमो नमः। ॐ नम इन्द्राक्ष्यै मात्स्यै।

मूषकवाहन मोदकहस्त
चामरकर्णविलम्बितसूत्र॥
वामनरूप महेश्वरपुत्र
विघ्नविनायकपाद नमस्ते॥१॥

अथ इन्द्राक्षीयन्त्रम्॥



॥ॐ॥

 श्री इन्द्राक्षीकवचम्॥

ॐ अस्य श्री इन्द्राक्षी स्तोत्रमहामन्त्रस्य प्राचीपुरन्दर ऋषिः, अनुष्टुप् छन्दः, इन्द्राक्षी दुर्गा देवता। लक्ष्मीबीजम्। भुवनेश्वरी शक्तिः, भवानीति कीलकम्, मम इन्द्राक्षीप्रसादसिद्ध्यर्थे जपे पाठे वा विनियोगः॥

अथ करन्यासः

ॐ इन्द्राक्षीत्यङ्गुष्ठाभ्यां नमः। ॐ महालक्ष्मीरिति तर्जनीभ्यां नमः। ॐ माहेश्वरीति मध्यमाभ्यां नमः। ॐ अम्बुजाक्षीति अनामिकाभ्यां नमः॥ ॐ कात्यायनीति कनिष्ठिकाभ्यां नमः। ॐ कौमारीति करतलकरपृष्ठाभ्यां नमः॥

अथ षडङ्गन्यासः।

ॐ इन्द्राक्षीति हृदयाय नमः। ॐ महालक्ष्मीरिति शिरसे स्वाहा। ॐ माहेश्वरीति शिखायै वषट्॥ ॐ [illegible]ति कवचाय हुम्। ॐ कात्यायनी

नेत्रत्रयाय वौषट्। ॐ क्रौं मारीत्यस्त्राय फट्॥

ॐ भूर्भुवस्स्वरोमिति दिग्बन्धः॥

प्राणायामः

॥अथ ध्यानम्॥

नेत्राणां दशभिश्शतैः परिवृतामत्युग्रचर्माम्बरां
हेमाभां महतीं विलम्बितशिखामामुक्तकेशान्विताम्॥
घण्टामण्डितपादपद्मयुगलां नागेन्द्रकुम्भस्तनी-
मिन्द्राक्षीं परिचिन्तयामि मनसा कल्पोक्तसिद्धिप्रदाम्॥
॥१॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम्।
वामे हस्ते वज्रधरां दक्षिणेन वरप्रदाम्॥ १।
इन्द्रादिभिः सुरैर्वन्द्यां वन्दे शंकरवल्लभाम्।
एवं ध्यात्वा महादेवीं जपेत् सर्वार्थसिद्धये॥२॥
इन्द्राक्षीं नौमि युवतीं नानालंकारभूषिताम्।
प्रसन्नवदनाम्भोजामप्सरोगणसेविताम्॥

नेट: इन्द्राक्षीति हृदयाय नमः से ... सेविताम्। तक दो बार नम करना चाहिए॥

श्री इन्द्र उवाच —

इन्द्राक्षी पूर्वतः पातु पात्वाग्नेय्यां दशेश्वरी।
कौमारी दक्षिणे पातु नैरृत्यां पातु पार्वती॥४॥
वाराही पश्चिमे पातु वायव्ये नारसिंह्यपि।
उदीच्यां कालरात्री मामैशान्यां सर्वशक्तयः॥५॥
भैरव्यूर्ध्वं सदा पातु पात्वधो वैष्णवी सदा।
एवं दश दिशो रक्षेत् सर्वाङ्गं भुवनेश्वरी॥६॥

अथ श्री इन्द्राक्षीकवचम्॥

ॐ नमो भगवत्यै इन्द्राक्ष्यै महालक्ष्म्यै सर्वजन वशंकर्यै सर्वदुष्टग्रहस्तम्भिन्यै स्वाहा॥

ॐ नमो भगवति पिङ्गलभैरवि त्रैलोक्यलक्ष्मि त्रैलोक्यमोहिनीन्द्राक्षि मां रक्ष रक्ष हुँ फट् स्वाहा॥

ॐ नमो भगवति भद्रकालि महादेवि कृष्ण-वर्णे तुङ्गस्तनि शूर्पहस्ते कवाटवक्षःस्थले

[illegible] भैरव [illegible] ग्रामे [illegible] पद्मे [illegible]

पवीतिन्नि मस्मो भु वालित सर्वगात्रीन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा॥

ॐ नमो भगवति प्रत्यङ्गिरे पद्मासने सिंहवाहने महिषासुरमर्दिनि ज्वरपित्तज्वरवातज्वर श्लेष्मज्वरकफज्वरसंनिपातज्वरकृत्रिमज्वरकुत्सादिज्वरैकाहिकज्वर द्व्याहिकज्वर त्र्याहिकज्वर चतुराहिकज्वर पञ्चाहिकज्वर पक्षज्वर मासज्वर षण्मासज्वर संवत्सरज्वर सर्वाङ्गज्वरान् नाशय नाशय हर हर जहि जहि दह दह पच पच ताडय ताडय आकर्षय आकर्षय [illegible] [illegible] मोहय मोहय उच्चाटय उच्चाटय [illegible] फट् स्वाहा॥

ॐ ह्रीं ॐ नमो भगवति प्रत्यङ्गिरे [illegible]

[illegible]

परयंत्रपरत त्रब्रमोदीनि प्रतिपक्षवंद्धांसिनि
परबलदुर्गविमर्दीनि प्रातुकर च्छेदीनि सक-
लदुष्टज्वरनिवारिणि भूतप्रेतपिशाचब्रह्म-
राक्षसयक्ष यमदूत शाकिनीडाकिनीकामिनी
स्तम्भिनीमोहिनीवशंकरी कुक्षिरोगशिरोरोग
नेत्ररोगक्षयापस्मारकुष्ठादि महारोगनिवारि-
णि मम सर्वरोगान् नाशय नाशय ह्रां ह्रीं
ह्रूं ह्रैं ह्रौं ह्रः हुं फट् स्वाहा॥
ॐ ऐं श्रीं हुं हुं इन्द्राक्षि मां रक्ष रक्ष,
[illegible] शत्रून् नाशय नाशय, जलरोगान्
शोषय शोषय, दुःखव्याधीन् स्फोटय स्फोटय,
[illegible] [illegible] राजरोगान् [illegible] [illegible]
[illegible] [illegible]

[illegible] रक्ष [illegible] हुं फट्

ॐ नमो भगवति माहेश्वरि महाचिन्तामणि दुर्गे सकलसिद्धेश्वरी सकलजनमनोहारिणि कालकालरात्रि, अनले ऽजिते ऽभये महाघोररूपे विश्वरूपिणि मधुसूदनि महाविष्णुस्वरूपिणि नेत्रशूल कर्णशूल कटिशूल पक्षशूल पाण्डुरोग कमलादीन् नाशय नाशय वैष्णवि ब्रह्मास्त्रेण विष्णुचक्रेण रुद्रशूलेन यमदण्डेन वरुणपाशेन वासववज्रेण सर्वानरीन् भञ्जय भञ्जय यक्षग्रह राक्षसग्रह स्कन्दग्रह विनायकग्रह बालग्रह चौरग्रह कूष्माण्डग्रहादीन् निगृह्ण निगृह्ण, राजयक्ष्मा [illegible] तापज्वर निवारिणि मम सर्वज्वरनाशन [illegible] य सर्वग्रहान् [illegible] उच्चाटय उच्चाटय हुं फट् [illegible]

अथ इन्द्राक्षी-स्तोत्रम्।

इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता। गौरी शाकम्भरी देवी दुर्गा नाम्नीति विश्रुता।

कात्यायनी महादेवी चन्द्रघण्टा महातपाः।
सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी॥२॥
नारायणी भद्रकाली रुद्राणी कृष्णपिङ्गला॥
अग्निज्वाला रौद्रमुखी कालरात्री तपस्विनी॥३॥
मेघस्वना सहस्राक्षी विकटाङ्गी जलोदरी॥
महोदरी मुक्तकेशी घोररूपा महाबला॥४॥
अजिता भद्रदाऽनन्दा रोगहर्त्री शिवप्रिया।
शिवदूती कराली च प्रत्यक्षपरमेश्वरी॥५॥
इन्द्राणी इन्द्ररूपा च इन्द्रशक्तिः परायणा॥
सदा सम्मोहिनी देवी सुन्दरी भुवनेश्वरीति ६॥
एकाक्षरी परा ब्राह्मी स्थूलसूक्ष्मप्रवर्तिनी॥
[illegible] कल्याणी भोगमोक्षप्रदायिनी॥७॥
[illegible] हर्त्री चामुण्डा सुरनायिका॥
[illegible] नारसिंही [illegible] भैरवी [illegible]॥८॥

प्रीतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ॥
अनन्ता विजयापर्णा मानस्तोकपराजिता ॥९॥
भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा ॥
शिवा भवानी रुद्राणी शंकरार्धशरीरिणी ॥१०॥
ऐरावतगजारूढा वज्रहस्ता वरप्रदा ॥
भ्रामरी काञ्चिकामाक्षी क्वणन्माणिक्यनूपुरा ॥११॥
त्रिपाद् भस्मप्रहरणा त्रिशिरा रक्तलोचना ॥
शिवा च शिवरूपा च शिवभक्तिपरायणा ॥१२॥
मृत्युंजया महामाया सर्वरोगनिवारिणी ॥
ऐन्द्री देवी सदा कालं शान्तिमाशु करोतु मे ॥१३॥
भस्मायुधाय विद्महे, रक्तनेत्राय धीमहि ।
तन्नो ज्वरहरः प्रचोदयात् ॥१४॥
एतत् स्तोत्रं जपेन्नित्यं सर्वव्याधि [illegible]
[illegible] सौम्ये [illegible] विजया [illegible]

एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण धीमता।
सा मे प्रीत्या सुखं दद्यात् सर्वापत्तिनिवारिणी ॥२॥
ज्वरं भूतज्वरं चैव शीतोष्णज्वरमेव च।
ज्वरं ज्वरातिसारं च अतिसारज्वरं हर ॥३॥
शतमावर्तयेद् यस्तु मुच्यते व्याधिबन्धनात्।
आवर्तयन् सहस्रं तु लभते वाञ्छितं फलम् ॥४॥
इति स्तोत्रमिदं पुण्यं जपेदायुष्यवर्द्धनम्।
विनाशाय च रोगाणामपमृत्युहराय च ॥५॥
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥६॥
इति शुभं भूयात् लेखकस्य॥

अथ सरस्वती कवचम्॥
ॐ नमः सरस्वत्यै॥

ब्रह्मा उवाच –

शृणु वत्स प्रवक्ष्यामि कवचं सर्वकामदम्॥
श्रुतिसारं श्रुतिसुखं श्रुत्युक्तं श्रुतिपूजितम्॥१॥
उक्तं कृष्णेन गोलोके मह्यं वृन्दावने वने॥
रासेश्वरेण विभुना रासेवैरास मण्डले॥२॥
अतीवगोपनीयं च कल्पवृक्षसमं परम्॥
अश्रुताद्भुतमंत्राणां समूहैश्च समन्वितम्॥३॥
यद्धृत्वा पठनाद्ब्रह्मन् बुद्धिमांश्च बृहस्पतिः॥
यद्धृत्वा भगवाञ्छुक्रः सर्वदैत्येषु पूजितः॥४॥
पठनाद्धारणाद्वाग्मी कवीन्द्रो वाल्मिको मुनिः॥
स्वायम्भुवो मनुश्चैव यद्धृत्वा सर्वपूजितः॥५॥
कणादो गौतमः कण्वः पाणिनि शाकटायनः॥
ग्रन्थं चकार यद्धृत्वा दक्षः कात्यायनः स्वयम्॥
धृत्वा वेदविभागं च पुराणान्यखिलानि च॥
चकार लीलामात्रेण कृष्णद्वैपायनः स्वयम्॥

सारस्वती कवचम्

शातातपश्च संवर्तो वशिष्ठश्च पराशरः ।।
यद्धृत्वा पठनाद्ब्रह्मं याज्ञवल्क्यश्चकार सः ।।८।।
ऋष्यशृङ्गो भारद्वाजश्चास्तीको देवलस्तथा ।।
जैगीषव्योऽथ जाबालिर्यद्धृत्वा सर्वपूजितः ।।९।।
कवचस्यास्य विप्रेन्द्र ऋषिरेष प्रजापतिः ।।
स्वयं च बृहतीच्छन्दो देवो रासेश्वरः प्रभुः ।।१०।।
सर्वतत्वपरिज्ञाने सर्वार्थसाधनेषु च ।।
कवितासु च सर्वासु विनियोगः प्रकीर्तितः ।।११।।
ॐ ह्रीं सरस्वत्यै स्वाहा शिरो मे पातु सर्वतः ।
श्रीं वाग्देवतायै स्वाहा भालं मे सर्वदावतु ।।१२।।
ॐ सरस्वत्यै स्वाहेति श्रोत्रं पातु निरन्तरम् ।।
ॐ श्रीं ह्रीं भारत्यै स्वाहा नेत्रयुग्मं सदावतु ।।१३।।
ऐं ह्रीं वाग्वादिन्यै स्वाहा नासां मे सर्वतोऽवतु ।।
ह्रीं विद्याधिष्ठातृदेव्यै स्वाहा ओष्ठं सदावतु ।।

ॐ ह्रीं ब्राह्म्यै स्वाहेति दन्तपंक्तिः सदावतु॥
ऐमित्येकाक्षरो मन्त्रो मम कण्ठं सदावतु॥१५॥
ॐ श्रीं ह्रीं पातु मे ग्रीवां स्कन्धं मे श्रीः सदावतु॥
श्रीं विद्याधिष्ठातृदेव्यै स्वाहा वक्षः सदावतु॥१६
ॐ ह्रीं विद्यास्वरूपायै स्वाहा मे पातु नाभिकाम्॥
ॐ ह्रीं ह्रीं वाण्यै स्वाहेति मम पृष्ठं सदावतु॥१७॥
ॐ सर्ववर्णात्मिकायै पादयुग्मं सदावतु॥
ॐ रागाधिष्ठातृदेव्यै सर्वाङ्गं मे सदावतु॥१८॥
ॐ सर्वकण्ठवासिन्यै स्वाहा प्राच्यां सदावतु॥
ॐ ह्रीं जिह्वाग्रवासिन्यै स्वाहाग्निदिशि रक्षतु॥१९॥
ॐ ऐं ह्रीं श्रीं सरस्वत्यै बुधजनन्यै स्वाहा॥
सततं मन्त्रराजोऽयं दक्षिणे मे सदा [illegible]
ॐ ह्रीं श्रीं त्र्यक्षरो मन्त्रो नैरृत्यां मे स [illegible]
कवि [illegible]

(६५) सरस्वतीकवचम् ॥

ॐ सदाम्बिकायै स्वाहा वायव्यां मां सदावतु ॥
ॐ गद्यपद्यवासिन्यै स्वाहा मामुत्तरेऽवतु ॥२२॥
ॐ सर्वशास्त्रवासिन्यै स्वाहैशान्यां सदावतु ॥
ॐ ह्रीं सर्वपूजितायै स्वाहा चोर्ध्वं सदावतु ॥२३॥
ऐं ह्रीं पुस्तकवासिन्यै स्वाहाधो मां सदावतु ॥
ॐ ग्रन्थबीजरूपायै स्वाहा मां सर्वतोऽवतु ॥२४॥
इति ते कथितं विप्र सर्वमन्त्रौघविग्रहम् ॥
इदं विश्वजयं नाम कवचं ब्रह्मरूपिणम् ॥२५॥
पुरा श्रुतं धर्मवक्त्रात् पर्वते गन्धमादने ॥
तव स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् ॥२६॥
गुरुमभ्यर्च्य विधिवद् वस्त्रालंकारचन्दनैः ॥
प्रणम्य दण्डवत् भूमौ कवचं धारयेत् सुधीः ॥२७॥
पञ्चलक्षजपेनैव सिद्धं तु कवचं भवेत् ॥
यदि स्यात् सिद्धकवचो बृहस्पतिसमो भवेत् ॥
॥२८॥

महावाग्मी कवीन्द्रश्च त्रैलोक्यविजयी भवेत्॥
शक्नोति सर्वं जेतुं स कवचस्य प्रसादतः॥८५॥
इति ते कण्वशाखोक्तं कथितं कवचं मुने॥
स्तोत्रं पूजाविधानं च ध्यानं च वन्दनं तथा॥
इति श्री ब्रह्मवैवर्ते महापुराणे प्रकृतिखण्डे
नारायणनारदसंवादे सांङ्गः साकुल्यः सपरिवार
समहनः सम्पूर्णः श्रीसरस्वतीकवचः
श्रीरस्तु श्रीरस्तु॥

इति शुभं भूयात् लेखकस्य॥

नाम	मूल्य

Arjun Nath Ha

Arjun Nath Han

Arjun

